२०

॥विष्णुसूक्तं मित्रावरुणसूक्तं च॥

प्रस्तावना

वेदो ज्ञानराशिः शब्दराशिश्च। वेदः अपौरुषेय इति एव परम्परा। प्राणिमात्रस्य इष्टप्राप्तेः अनिष्टपरिहारस्य च अलौकिकम् उपायं वेदयति वेदः। वेदेन ज्ञाप्यमाना उपायाः प्रत्यक्षेण अनुमानेन वा प्रमाणेन अगम्याः सन्ति। केवलम् वेदशब्देभ्य एव ते उपाया ज्ञातुं शक्याः। ईश्वरोऽपि सृष्टिकरणे वेदज्ञानम् आश्रित्य जगत् सृजत्। तदिदं वैदिकं ज्ञानं निर्भ्रान्तम् प्रमादरहितं च। स च वेदः प्रयोगभेदेन यज्ञनिर्वाहकत्वाद् ऋक् यजुः साम इति त्रेधा भिन्नः। स एव त्रयी इत्युच्यते। प्रतिवेदम् पुनः मन्त्रः ब्राह्मणम् इति द्विविधो विभागो प्रकल्पितो वेदविद्भिः। मन्त्र एव संहिता इत्यपि प्रचारः। मन्त्रस्तावत् यज्ञाद्यनुष्ठानकारणभूदद्रव्यदेवतादिप्रकाशकः। ब्राह्मणस्तु विध्यर्थवादादिप्रतिपादकः अनेकविधः। स्तुत्यात्मक ऋग्वेदः। तस्य ऋग्वेदस्य मण्डलरूपेण अष्टकरूपेण च द्वेधा विभाजनमस्ति। तत्र मण्डलरूपेण विभागे सति सूक्तम् इदम् ऋग्वेदस्य प्रथमे मण्डले (१.१५४) चतुःपञ्चाशदधिकैकशततमं सूक्तम्। मन्त्रात्मकस्य ऋग्वेदस्य अयमंशः।

अस्मिन् पाठे विष्णुसूक्तं मित्रावरुणसूक्तं च पाठ्यत्वेन विद्यते। पूर्वार्धे **विष्णुसूक्तं** विद्यते, उत्तरार्धे च **मित्रावरुणसूक्तम्** उपन्यस्तमस्ति।

विष्णुसूक्ते अपि विष्णुदेवतायाः स्तुतिः विहिता। अत्र विष्णोः माहात्यं वर्णितम्। अस्य सूक्तस्य ऋषि: दीर्घतमा औचथ्यः, छन्दः विराट् त्रिष्टुप्, देवता विष्णुः। अस्मिन् सूक्ते विष्णोः वीर्यता प्रकटिता। विष्णोः निकटे यत् यत् प्रार्थितं तदपि प्रकटितम्। अस्मिन् पाठे विष्णुसूक्ते विद्यमानाः षट् मन्त्राः प्रतिपादिताः।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- सूक्तस्थानां मन्त्राणां संहितापाठं ज्ञास्यति।
- सूक्ते विद्यमानानां मन्त्राणां पदपाठं ज्ञास्यति।
- सूक्तस्थानां मन्त्राणाम् अन्वयं कर्तुं समर्थो भवेत्।
- सूक्तस्थानां मन्त्राणां व्याख्यानं कर्तुं समर्थो भवेत्।
- सूक्ते विद्यमानानां मन्त्राणां सरलार्थं ज्ञास्यति।

- मन्त्रे स्थितं व्याकरणं ज्ञातुं समर्थो भवेत्।
- सूक्ततात्पर्यं सूक्ततत्त्वं च अवगच्छेत्।
- सूक्तार्थं ज्ञात्वा सूक्तमहिमानम् ज्ञास्यति।
- वैदिकशब्दान् ज्ञातुं शक्नुयात्।
- वैदिकलौककयोः भेदं ज्ञातुं शक्नुयात्।
- केषाञ्चित् वैदिकरूपाणि ज्ञास्यति।

॥विष्णुसूक्तम्॥

२०.१) अधुना मूलपाठं पठाम (विष्णुसूक्तम्)

विष्णोर्नु कं वीर्याणि प्र वोचं
यः पार्थिवानि विममे रजांसि।
यो अस्कभायदुत्तरं सधस्थं
विचक्रमाणस्त्रेधोरुगायः॥ १॥
प्र तद्विष्णुः स्तवते वीर्येण
मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणे-
ष्वधिक्षियन्ति भुवनानि विश्वा॥२॥
प्र विष्णवे शूषमेतु मन्म
गिरिक्षित उरुगायाय वृष्णे।
य इदं दीर्घं प्रयतं सधस्थ-
मेको विममे त्रिभिरित्पदेभिः॥ ३॥
यस्य त्री पूर्णा मधुना पदा-
न्यक्षीयमाणा स्वधया मदन्ति।
य उ त्रिधातु पृथिवीमुत द्या-
मेको दाधार भुवनानि विश्वा॥ ४॥

तदस्य प्रियमभि पाथो अश्यां
नरो यत्र देवयवो मदन्ति।
उरुक्रमस्य स हि बन्धुरित्था
विष्णोः पदे परमे मध्व उत्सः॥ ५॥
ता वां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृङ्गा अयासः।
अत्राह तदुरुगायस्य वृष्णः
परमं पदमव भाति भूरि॥ ६॥

२०.१.१) इदानीं मूलपाठम् अवगच्छाम (विष्णुसूक्तम्)

विष्णोर्नु कं वीर्याणि प्र वोचं
यः पार्थिवानि विममे रजांसि।
यो अस्कभायदुत्तरं सधस्थं
विचक्रमाणस्त्रेधोरुगायः॥ १॥

पदपाठः- विष्णोः। नु। कम्। वीर्याणि। प्र। वोचम्। यः। पार्थिवानि। विऽममे। रजांसि॥ यः। अस्कभायत्। उत्ऽतरम्। सधऽस्थम्। विऽचक्रमाणः। त्रेधा। उरुऽगायः॥ १॥

अन्वयः- हे मनुष्या यः पार्थिवानि रजांसि नु विममे य उरुगाय उत्तरं सधस्थं त्रेधा विचक्रमाणोऽस्कभायत्तस्य विष्णोर्वीर्याणि प्रवोचमनेन कं प्राप्नुयां तथा यूयमपि कुरुत ॥१॥

व्याख्या- हे नराः विष्णोः व्यापनशीलस्य देवस्य वीर्याणि वीरकर्माणि नु कम् अतिशीघ्रं प्र वोचम् प्रब्रवीमि। कानि तानीति लोकत्रयाभिमानीति अग्निवाय्वादित्यरूपाणि रजांसि विममे विशेषेण निर्ममे। अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः। तस्मात् लोकत्रयस्य पृथिवीशब्दवाच्यत्वम्। किंच यः च विष्णुः उत्तरम् उद्गततरमतिविस्तीर्णं सधस्तं सहस्थानं लोकत्रयाश्रयभुतमन्तरिक्षम् अस्कभायत् तेषामाधारत्वेन स्तम्भितवान् निर्मितवानित्यर्थः। अनेन अन्तरिक्षाश्रितं लोकत्रयमपि सृष्टवानित्युक्तं भवति। यद्वा। यो विष्णुः पार्थिवानि पृथिवीसंबन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान् विममे विविधं निर्मितवान्। रजःशब्दो लोकवाची, 'लोका रजांस्युच्यन्ते' इति यास्केनोक्तत्वात्। किञ्च यश्चोत्तरम् उद्गततरम्

उत्तरभाविनं सधस्थं सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकम् अस्कभायत् स्कम्भितवान् सृष्टवानित्यर्थः। स्कम्भेः 'स्तम्भुस्तुम्भु' इति विहितस्य श्नः 'छन्दसि शायजपि' इति व्यत्ययेन शायजादेशः। अथवा पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे। भूरादिलोकत्रयमित्यर्थः। भूम्याम् उपार्जितकर्मभोगार्थत्वात् इतरलोकानां तत्कारणत्वम्। किंच यश्चोत्तरम् उत्कृष्टतरं सर्वेषां लोकानामुपरिभूतम्। अपुनरावृत्तेः तस्योत्कृष्टत्वम्। सधस्थम् उपासकानां सहस्थानं सत्यलोकमस्कभायत् स्कम्भितवान् ध्रुवं स्थापितवानित्यर्थः। किं कुर्वन्। त्रेधा विचक्रमाणः त्रिप्रकारं स्वसृष्टान् लोकान्विविधं क्रममाणः। विष्णोस्त्रेधा क्रमणम् 'इदं विष्णुर्विचक्रमे' (ऋ० स० १.२२.१७) इत्यादिश्रुतिषु प्रसिद्धम्। अत एव उरुगायः उरुभिः महद्भिः गीयमानः अतिप्रभूतं गीयमानो वा। य एवं कृतवान् तादृशस्य विष्णोर्वीर्याणि प्रवोचम्।

टिप्पणी - नु - शीघ्रम्। कम् इति पादपूर्णार्थो निपातः। यद्यपि नु कम् इति भिन्नौ निपातौ तथापि निघण्टौ हिकम् नुकम् सुकम् आहिकम् आकीम् नकिः माकिः नकीम् आकृतम् इति नवानाम् एकपद्वेन गणना कृता। निपातयोः समासो न भवति। अतः पदपाठे द्वौ पृथगेव प्रदर्शितौ।

सरलार्थः- शीघ्रमेव अहं विष्णोः वीर्यपूर्णकार्याणां वर्णनं करिष्यामि, यः महान् गतिसम्पन्नः पादत्रयं गत्वा पार्थिवानि अमायत। किञ्च यः (पवित्रात्मनः कृते) प्रशस्तं मेलनस्थानं निर्माति स्म। अस्य अयं भावः यत् यथा सूर्यः स्वाकर्षणेन सर्वान् भूगोलान् धरति तथा सूर्यादीन् लोकान् कारणं जीवांश्च जगदीश्वरो धत्ते य इमान् असंख्यलोकान् सद्यो निर्ममे यस्मिन् इमे प्रलीयन्ते च स एव सर्वैः उपास्यः।

व्याकरणम् -

- अस्कभायत् - स्कभि प्रतिबन्धे इति धातोः लङ्-लकारे प्रथमपुरुषे एकवचने रूपमिदम्। स्तम्भिवान् इत्यर्थः।
- उत्तरम् सधस्थम् - सहशब्दात् उत्तरपदमस्ति चेत् वेदे सहशब्दस्य सध इति प्रयोगः भवति। उत्तरम् इत्यस्य उपरि इत्यर्थः। उपरि पुण्यकृताम् लोकः इति।
- विचक्रमाणः - विपूर्वकात् क्रमु पादविक्षेपे इति धातोः कानच्-प्रत्यययोगेन विचक्रमाण इति शब्दो निष्पद्यते।
- उरुगायः - ऊर्णु आच्छादने इति धातोः उण्-प्रत्यययोगेन उरुशब्दः लभ्यते। गा गतौ इति धातोः अण्-प्रत्यययोगेन गायशब्दः लभ्यते। विष्णुः उरुगायः इति कथ्यते। बहुगतिमान् महागतिः इति तदर्थः। कुतः एवम्। त्रिषु पादेषु त्रीन् लोकान् अतिक्रामति। अत एवमुक्तम्।

प्र तद्विष्णुः स्तवते वीर्येण
मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणे-
ष्वधिक्षियन्ति भुवनानि विश्वा।। २।।

पदपाठः- प्र। तत्। विष्णुः। स्तवते। वीर्येण। मृगः। न। भीमः। कुचरः। गिरिऽस्थाः।।

यस्य। उरुषु। त्रिषु। विऽक्रमणेषु। अधिऽक्षियन्ति। भुवनानि। विश्वा।। २।।

अन्वयः- हे मनुष्या यस्य निर्मितेषूरुषु त्रिषु विक्रमणेषु विश्वा भुवनान्यधिक्षियन्ति तत् स विष्णुः स्ववीर्येण कुचरो गिरिष्ठा मृगो भीमो नेव विश्वाँल्लोकान् प्रस्तवते ॥२॥

व्याख्या- यस्येति वक्ष्यमाणत्वात् स इति अवगम्यते। स महानुभावः वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण स्तवते स्तूयते सर्वैः। वीर्येण स्तूयमानत्वे दृष्टान्तः। मृगो न सिंहादिरिव। यथा स्वविरोधिनो मृगयिता सिंहः भीमः भीतिजनकः कुचरः कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगन्ता वा गिरिष्ठाः पर्वताद्युन्नतप्रदेशस्थायी सर्वैः स्तूयते। अस्मिन्नर्थे निरुक्तं- 'मृगो न भीमः कुचरो गिरिष्ठाः'। मृग इव भीमः कुचरो गिरिष्ठाः। मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्भीष्मोऽप्येतस्मादेव। कुचर इति चरतिकर्म कुत्सितमथ चेद्देवताभिधानं क्वायं न चरतीति। गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान् पर्वतः। तद्द्वयमपि मृगोऽन्वेष्टा शत्रूणां भीमो भयानकः सर्वेषां भीत्यपादानभूतः। परमेश्वराद्भीतिः 'भीषास्माद्वातः पवते' (तै० आ० ८.८.१) इत्यादिश्रुतिषु प्रसिद्धा। किंच कुचरः शत्रुवधादिकुत्सितकर्मकर्ता कुषु सर्वासु भूमिषु लोकत्रयेषु संचारी वा तथा गिरिष्ठाः गिरिवत् उच्छ्रितलोकस्थायी। यद्वा। गिरि मन्त्रादिरूपायां वाचि सर्वदा वर्तमानः। ईदृशोऽयं स्वमहिम्ना स्तूयते। किंच यस्य विष्णोः उरुषु विस्तीर्णेषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातानि आश्रित्य निवसन्ति स विष्णुः स्तूयते।

टिप्पणी - अस्मिन् मन्त्रे उरुषु त्रिषु विक्रमणेषु इति अत्र बहुविधानि मतानि आचार्याणां सन्ति। विक्रमणशब्दस्य पादप्रक्षेपः अर्थः। उरुशब्दस्य विस्तीर्ण इत्यर्थः। विस्तीर्णेषु त्रिषु पादप्रक्षेपेषु सर्वाणि भुवन्ति अधिक्षियन्ति आश्रित्य तिष्ठन्ति। विश्व इति सर्वनाम्नः विश्वानि इति रूपम्। वेदे तु विश्वा इति स्थितिः। विष्णोः त्रिषु पादप्रक्षेपेषु सर्वाणि भुवनानि सन्ति। अर्थात् विष्णुः त्रीभिः पादप्रक्षेपैः सर्वाणि भुवनानि अर्थात् सृष्टं जगत् समग्रम् अतिक्रामति। कानि अत्र भुवनानि। के ते पादप्रक्षेपाः। कोऽयमत्र विष्णु। किं तस्य स्वरूपम्। पूर्वमन्त्रे उक्तं यद् विष्णुः उपरि लोकान् अधोलोकान् च सृष्टवान्। शाकपूणिः नाम कश्चित् व्याख्याता आह - विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्याम् अन्तरिक्षे दिवि इति। और्णनाभः इति आचार्यस्य मतं यद् विष्णुरत्र सूर्यः। पूर्वाह्णे समारोहणे प्रथमपादं निधत्ते। मध्याह्ने आकाशम् आरोढुं द्वितीयं पादं निक्षिपति। अपराह्णे गृहं प्रति गमनाय च तृतीयम् पादं प्रसारयति इति।

तस्य इत्थमपि व्याख्या सम्भवति - यः सृष्टिकर्ता स एव विष्णुः। स एव त्रिषु पादप्रक्षेपेषु सृष्टिम् अतिक्रामति। अर्थात् सृष्टिकाले एकः पादप्रक्षेपः। स्थितिकाले द्वितीयः पादप्रक्षेपः। प्रलयकाले तृतीयः पादप्रक्षेपः। इत्थम् सृष्टिम् स अतिक्रामति। यद्यपि एक एव ईश्वरः सृष्टिकाले ब्रह्मा, पालनरतो विष्णुः, संहारे प्रवृत्तः महेश्वरः इति त्रिभिर्नामभिर्गीयते। तथापि वेदोत्तरसाहित्येऽपि विष्णुरेव सृष्टिस्थितिसंहृतिकर्ता इति बाहुल्येन उक्तं दृश्यते।

सरलार्थः- विष्णुः यस्य त्रिषु पादेषु समस्तप्राणी निवसति, यः वीर्ययुक्तकार्याय स्तुत्यः भवति। यथा पर्वते निवसन्तः किञ्च स्वेच्छया विचरन्तः भयङ्कराः पशवः। अस्य अयं भावः यत् अत्रोपमालङ्कारः।

नहि कश्चिदपि पदार्थ ईश्वरसृष्टिनियमक्रममुल्लङ्घितुं शक्नोति यो धार्मिकाणां मित्रइवाह्लादप्रदो दुष्टानां सिंहइव भयप्रदो न्यायादिगुणधर्त्ता परमात्माऽस्ति स एव सर्वोषामधिष्ठाता न्यायाधीशोऽस्तीति वेदितव्यम्।

व्याकरणम् -

- स्तवते - स्तु प्रशंसायाम् इति धातोः कर्मणि आत्मनेपदम् इदम्। प्रथमपुरुषस्य एकवचनम्।
- मृगः - मृज् गतौ इति धातोः कप्रत्यये मृगशब्दो निष्पद्यते।
- भीमः - भी भये इति धातोः मक् प्रत्ययः प्रयुक्तः अस्ति।
- अधिक्षियन्ति - अधिपूर्वकात् क्षि निवासे इति धातोः लटि प्रथमपुरुषे बहुवचने इदं रूपम्। आश्रित्य निवसन्ति इति तदर्थः।
- गिरिष्ठाः - गिरिशब्दात् स्था गतिनिवृत्तौ इति धातोः क्विपि प्रत्यये गिरिष्ठाः इति रूपम्। तत्र गिरि इति पदेऽपि गिर् इति वाणी। तस्य सप्तमी गिरि। तस्याम् तिष्ठति स गिरिष्ठाः इति। अर्थात् वाण्याम् तिष्ठति सः। गिरिशब्दः पर्वतवाची वर्तते। तदा तु पर्वते तिष्ठति सः इति अर्थः आयाति। अर्थात् पर्वतः यथा उच्छ्रितः तथा उन्नतलोकवासी इत्यर्थः।

प्र विष्ण॑वे शू॒षमे॑तु॒ मन्म॑
गिरि॒क्षित॑ उरुगा॒याय॒ वृष्णे॑।
य इ॒दं दी॒र्घं॑ प्रय॑तं स॒धस्थ॒-
मेको॑ विम॒मे त्रि॒भिरित्प॒देभि॑ः।। ३।।

पदपाठः- प्र। विष्ण॑वे। शू॒षम्। ए॒तु॒। मन्म॑। गि॒रि॒ऽक्षिते॑। उ॒रु॒ऽगा॒याय॑। वृष्णे॑।। यः। इ॒दम्। दी॒र्घम्। प्रऽय॑तम्। स॒धऽस्थ॑म्। एकः। वि॒ऽम॒मे। त्रि॒ऽभिः। इत्। प॒देभि॑ः।। ३।।

अन्वयः- हे मनुष्या य एक इत् त्रिभिः पदेभिरिदं दीर्घ प्रयतं सधस्थं प्रविममे तस्मै वृष्णे गिरिक्षित उरुगायाय विष्णवे मन्म शूषमेतु ॥३॥

व्याख्या- विष्णवे सर्वव्यापकाय शूषम् अस्मत्कृत्यादिजन्यं महत् बलत्वं मन्म मननं स्तोत्रं मननीयं शूषं बलं वा विष्णुम् एतु प्राप्नोतु। कर्मणः संप्रदानत्वात् चतुर्थी। कीदृशाय। गिरिक्षिते वाचि गिरिवदुन्नतप्रदेशे वा तिष्ठते उरुगायाय बहुभिर्गीयमानाय वृष्णे वर्षित्रे कामानाम्। एवं महानुभावं शूषं प्राप्नोतु। कोऽस्य विशेष इति उच्यते। यः विष्णुः इदं प्रसिद्धं दृश्यमानं दीर्घम् अतिविस्तृतं प्रयतं सधस्थं सहस्थानं लोकत्रयम् एकः इत् एक एवाद्वितीयः सन् त्रिभिः पदेभिः पादैः विममे विशेषेण निर्मितवान्।

सरलार्थः- (मम) शक्तिशाली प्रार्थना, प्रशस्तलोके वासकारिणं, प्रशस्तपादयुक्तम्, इच्छापूर्तिकारकं, विष्णुं प्रति (गच्छेत्) यः आत्मनः साधनायाः प्रशस्तमेलनस्थानं त्रिभिः पादैः अमायत।

अस्य एवं भावः न खलु कश्चिद् अपि अनन्तबलयुक्तं जगदीश्वरमन्तरेण इदं विचित्रं जगत् स्रष्टुं धर्त्तुं प्रलाययितुं च शक्नोति तस्मादेतं विहाय अन्यस्य उपासनं केनचिदपि नैव कार्य्यम्।

व्याकरणम् -

- शूषम् - शूषधातोः घञि शूष इति रूपम्। तस्य द्वितीयान्तम् रूपम् शूषम् इति।
- गिरिक्षिते - क्षि निवासे इति धातोः क्विप् प्रत्ययः। तुगागमः। गिरि+क्षिते

यस्य॒ त्री पू॒र्णा मधु॑ना प॒दा-
न्यक्षी॑यमाणा स्व॒धया॒ मद॑न्ति।
य उ॑ त्रि॒धातु॑ पृथि॒वीमु॒त द्या-
मेको॑ दा॒धार॒ भुव॑नानि॒ विश्वा॑।। ४।।

पदपाठः- यस्य॑। त्री। पू॒र्णा। मधु॑ना। प॒दानि॑। अक्षी॑यमाणा। स्व॒धया॑। मद॑न्ति।। यः।

ऊँम् इति॑। त्रि॒ऽधातु॑। पृ॒थि॒वीम्। उ॒त। द्याम्। एकः॑। दा॒धार॑। भु॒व॑नानि। विश्वा॑।। ४।।

अन्वयः- हे मनुष्या यस्य रचनायां मधुना पूर्णाऽक्षीयमाणा त्री पदानि स्वधया मदन्ति य एक उ पृथिवीमुत द्यां त्रिधातु विश्वा भुवनानि दाधार स एव परमात्मा सर्वैर्वेदितव्यः ॥४॥

व्याख्या- यस्य विष्णोः मधुना मधुरेण दिव्येनामृतेन पूर्णा पूर्णानि त्रीणि पदानि पादप्रक्षेपणानि अक्षीयमाणा अक्षीयमाणानि स्वधया अन्नेन मदन्ति मादयन्ति तदाश्रितजनान्। य उ य एव पृथिवीं प्रख्यातां भूमिं द्याम् उत द्योतनात्मकमन्तरिक्षं च विश्वा भुवनानि चतुर्दश लोकांश्च। यद्वा। पृथिवीशब्देन अधोवर्तीनि अतलवितलादिसप्तभुवनान्युपात्तानि। द्युशब्देन तदवान्तररूपाणि भुवादिसप्तभुवनानि। एवं चतुर्दश लोकान् विश्वा भुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि। त्रिधातु। त्रयाणां धातूनां समाहारस्त्रिधातु। पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं यथा भवति तथा दाधार धृतवान्। तुजादित्वात् अभ्यासस्य दीर्घत्वम्। उत्पादितवानित्यर्थः। छन्दोगारण्यके- 'तत्तेजोऽसृजत तदन्नमसृजत ता आप ऐक्षन्त' इति भूतत्रयसृष्टिमुक्त्वा 'हन्ताहमिमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छा० उ० ६.३.२-३) इत्यादिना त्रिवृत्करणसृष्टिरुपपादिता। यद्वा। त्रिधातु कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः।

सरलार्थः- अक्षीयमाणम्, यस्य मधुपूर्णं पादत्रयं (मनुष्येभ्यः) स्वशक्त्या आनन्दयति, यः एकाकी एव त्रीन् धातून्, पृथिवीम्, आकाशं तथा सम्पूर्णं लोकं धारयति (तं विष्णुं प्रति मम शक्तिशाली स्तुतिः गच्छेत्)। अस्य अयं भावः योऽनादिकारणात् सूर्यादिप्रकाशवत् क्षितीरुत्पाद्य सर्वैर्भोग्यैः पदार्थैः सह संयोज्याऽऽनन्दयति तद्गुणकर्मोपासनेनानन्दो हि सर्वैर्वर्द्धनीयः।

तदस्य प्रियमभि पाथो अश्यां
नरो यत्र देवयवो मदन्ति।
उरुक्रमस्य स हि बन्धुरित्था
विष्णोः पदे परमे मध्व उत्सः।। ५।।

पदपाठः- तत्। अस्य। प्रियम्। अभि। पाथः। अश्याम्। नरः। यत्र। देवऽयवः। मदन्ति।। उरुऽक्रमस्य। सः। हि। बन्धुः। इत्था। विष्णोः। पदे। परमे। मध्वः। उत्सः।। ५।।

अन्वयः- (अहं) यत्र देवयवो नरो मन्दति तदस्योरुक्रमस्य विष्णोः प्रियं पाथोभ्यश्यां यस्य परमे पदे मध्व उत्सइव तृप्तिकरो गुणो वर्त्तते स हि इत्था नो बन्धुरिवास्ति ॥५॥

व्याख्या- अस्य महतो विष्णोः प्रियं प्रियभूतं तत् सर्वैः सेव्यत्वेन प्रसिद्धं पाथः। अन्तरिक्षनामैतत्, 'पाथोऽन्तरिक्षं पथा व्याख्यातम्' (निरु० ६.७) इति यास्केनोक्तत्वात्। अविनश्वरं ब्रह्मलोकमित्यर्थः। अश्याम् व्याप्नुयाम्। तदेव विशेष्यते। यत्र स्थाने देवयवः देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तः नरः मदन्ति तृप्तिमनुभवन्ति। तदश्यामित्यन्वयः। पुनरपि तदेव विशेष्यते। उरुक्रमस्य अत्यधिकं सर्वं जगदाक्रममाणस्य तत्तदात्मना अत एव विष्णोः व्यापकस्य परमेश्वरस्य परमे उत्कृष्टे निरतिशये केवलसुखात्मके पदे स्थाने मध्वः मधुरस्य उत्सः निष्पन्दो वर्तते। तदश्याम्। यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति संकल्पमात्रेण अमृतकुल्यादिभोगाः प्राप्यन्ते तादृशमित्यर्थः। ततोऽधिकं नास्तीत्याह। इत्थमुक्तप्रकारेण स हि बन्धुः स खलु सर्वेषां सुकृतिनां बन्धुभूतो हितकरः वा तस्य पदं प्राप्तवतां न पुनरावृत्ते। 'न च पुनरावर्तते' इति श्रुतेस्तस्य बन्धुत्वम्। हिशब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः।

सरलार्थः- विष्णोः तं लोकं प्राप्तुम् इच्छामि यत्र देवतानाम् इच्छया मनुष्याः आनन्दं कुर्वन्ति। महतः गतिशीलस्य विष्णोः एकः मधुसरोवरः अस्ति। एवं निश्चयमेव स सर्वेषां मित्रमेव। अस्य अयं भावः अत्र उपमावाचकलुप्तोपमालङ्कारौ। ये परमेश्वरेण वेदद्वारा दत्ताम् आज्ञाम् अनुगच्छन्ति ते मोक्षसुखमश्नुवते। यथा जना बन्धुं प्राप्य सहायं लभन्ते तृषिता वा मधुरजलं कूपं प्राप्य तृप्यन्ति तथा परमेश्वरं प्राप्य पूर्णाऽनन्दा जायन्ते।

व्याकरणम् -

- देवयवः - देव+यु क्विप्
- इत्था - इत्थम् इत्यर्थे आत्वम्

ता वां वास्तून्युश्मसि गमध्यै

यत्र गावो भूरिशृङ्गा अयासः।

अत्राह तदुरुगायस्य वृष्णः

परमं पदमव भाति भूरि॥ ६॥

पदपाठः- ता। वाम्। वास्तूनि। उश्मसि। गमध्यै। यत्र। गावः। भूरिऽशृङ्गाः।

अयासः। अत्र। अह। तत्। उरुऽगायस्य। वृष्णः। परमम्। पदम्। अव। भाति। भूरि॥

६॥

अन्वयः- (हे आप्तौ विद्वांसौ) यत्रायासो भूरिशृङ्गा गावः सन्ति ता तानि वास्तूनि वां युवयोर्गमध्यै वयमुश्मसि। यदुरुगायस्य वृष्णः परमेश्वरस्य परमं पदं भूर्यवभाति तदत्राह वयमुश्मसि ॥६॥

व्याख्या- हे पत्नीयजमानौ वां युष्मदर्थं ता तानि गन्तव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोः गमनाय उश्मसि कामयामहे। तदर्थं विष्णुं प्रार्थयाम इत्यर्थः। तानीत्युक्तं कानीत्याह। यत्र येषु वास्तुषु गावः रश्मयः भूरिशृङ्गाः अत्यन्तोन्नत्युपेता बहुभिराश्रयणीया वा अयासः अयना गन्तारोऽतिविस्तृताः। यद्वा। अयासो गन्तारः। अतादृशाः। अत्यन्तप्रकाशयुक्ता इत्यर्थः। अत्र आह अत्र खलु वास्त्वाधारभूते द्युलोके उरुगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य वृष्णः कामानां वर्षितुर्विष्णोस्तत्तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूरि अतिप्रभूतम् अव भाति स्वमहिम्ना स्फुरति। अयं मन्त्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः- 'तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणयोद्गतमिति वा शिरसो निर्गतमिति वायासोऽयना। ' तत्र तदुरुगायस्य विष्णोः महागतेः परमं पदं पराध्यर्स्थम् अवभाति।

सरलार्थः- अस्मिन् मन्त्रे पत्नीयजमानौ प्रति उच्यते हे पत्नीयजमानौ युवां तत् स्थानं प्रति गच्छतं यत्र शृङ्गिनः सदा गतिशीलाः गावः सन्ति। यत्र महतः गतिशीलस्य, इच्छापूर्तिकारकस्य विष्णोः परमं धाम अधोलोके प्रकाशते। अयमस्य भावः यत् अत्र वाचकलुप्तोपमालङ्कारः। यत्र विद्वांसो मुक्तिं प्राप्नुवन्ति तत्र किञ्चिदप्यन्धकारो नास्ति प्राप्तमोक्षाश्च भास्वरा भवन्ति तदेवाप्तानां मुक्तिपदं ब्रह्म सर्वप्रकाशकमस्तीति।

व्याकरणम् -

- उश्मसि - वश् कान्तौ इति धातोः लट् प्रथमपुरुषः बहुवचनम्। वकारस्य उकारः अर्थात् सम्प्रसारणम् छान्दसम्।
- अयासः - इण् धातोः अचि जसि असुक् इति योगे अयास इति शब्दः निष्पद्यते। गन्तारः इति तदर्थः।

- वाम् - युष्मदर्थमिति बहुत्वम् द्विवचनस्थाने।
- गमध्यै - गम् धातोः तुमुनः स्थाने शध्यै प्रत्ययः। ततः इदं रूपम्।

पाठगतप्रश्नाः

१. विष्णुसूक्तस्य कः ऋषिः, किं छन्दः, का च देवता।
२. नु इत्यस्मिन् अर्थे किं पदद्वयं प्रयुक्तम्।
३. विष्णुशब्दस्य कः अर्थः।
४. वीर्याणि इत्यस्य कः अर्थः।
५. विममे इत्यस्य कः अर्थः।
६. रजःशब्दः कीदृशः।
७. विष्णोः कतिधा क्रमणम्।
८. कुचरः इत्यस्य कः अर्थः।
९. शूषम् इत्यस्य कः अर्थः।
१०. यस्य त्री पूर्णा... इत्यादिमन्त्रे पृथिवीशब्दस्य कः अर्थः।
११. दाधार इत्यस्य कः अर्थः।
१२. त्रिधातु इत्यस्य विग्रहवाक्यं लिखत।
१३. पाथः इत्यस्य कः अर्थः।
१४. स हि बन्धुरित्था... इत्यादि मन्त्रांशे हिशब्दः किमर्थः।
१५. उश्मसि इत्यस्य कः अर्थः।

२०.२) विष्णुस्वरुपम्।

विष्णुः एकः द्युस्थानीयः देवः। ऋग्वेदे तस्य स्तुत्यर्थं पञ्च सूक्तानि प्राप्यन्ते। यद्यपि सूक्तानां संख्या स्वल्पा विद्यते तथापि माहात्म्यदृष्ट्या एतानि शीर्षस्थानानि।

विष्णुशब्दः विष्-धातोः निष्पद्यते यस्य अर्थो भवति व्यापनशीलः इति। अर्थात् त्रिषु लोकेषु एव यस्य कीर्तिः सुप्रसिद्धा स भवति विष्णुः इति। विष्णुशब्दस्य अन्यः अर्थः भवति क्रियाशीलः। अयं विष्णुः सर्वापेक्षया अधिकक्रियाशीलः वर्तते। शरीरस्य अधिष्ठातृदेवः भवति विष्णुः। पक्षिणां मध्ये अस्य वाहनं भवति गरुडः इति। भीम-वृष्ण-गिरिजा-गिरिक्षत-सहीयान्-इत्यादिनाम्ना अपि अयमेव विष्णुः

व्यपदिश्यते। विष्णुः युवकः तथा विशालकायः अस्ति इति ऋग्वेदे वर्णितः। वामनावतारे स त्रिविक्रमरूपेण परिचितः। तस्य महत्त्वपूर्णं कार्यं भवति पादयोः त्रिवारं विस्तारः।

त्रीणि भान्ति रजांस्तस्य यत्पदानि तु तेजसा।

येन मेधातिथिः प्राह विष्णुमेनं त्रिविक्रमम्।।२.६४।।

ऋग्वेदे बहुवारमेव विक्रम-उरुक्रम-उरुगाय-इत्यादिशब्देन तस्य पादत्रयं वर्णितम् अस्ति। पादयोः त्रिः विस्तारेण स समग्रम् अपि विश्वं व्याप्नोत्। तस्य द्विः विस्तारः लौकिकमनुष्याणां ज्ञानविषयः भवति परन्तु तृतीयवारं यः विस्तारः सः साधारणैः अगम्यः। अतः ज्ञानिनः तृतीयं पादं द्रष्टुं गगने एव दृष्टिं स्थापयन्ति।

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिदीव चक्षुराततम्।।ऋग्वेद-१.२२.२०।।

यत्र सज्जनाः निवसन्ति पुनश्च यत्र मधुसरोवरः तत्रैव विष्णुः निवसति। विष्णुः यत्र निवसति तत्र देवाः सर्वदैव विचरन्ति। विष्णोः त्रयाणां पादानां विषये प्राचीनकालादेव विमतिः दृश्यते। विष्णोः प्रथमेन पादेन पृथ्वीलोकस्य सङ्क्रमणं द्वितीयेन च अन्तरिक्षलोकस्य तथा तृतीयेण द्युलोकस्थसूर्यमण्डलस्य सङ्क्रमणम् इत्यादिमतानि प्राप्यन्ते। वस्तुतस्तु विष्णुः सूर्यस्य एकः प्रतिरूपः अस्ति। अथर्ववेदेऽपि विष्णुदेवः उष्णप्रदातृत्वेन ख्यातः। **(अथर्ववेद-५.२६.७)।**

विष्णोः सम्बन्धः मुख्यरूपेण इन्द्रेण सहापि वर्तते। अयम् इन्द्रस्य मित्रं भवति। पुराणेषु एष विष्णुः उपेन्द्ररूपेणापि (इन्द्रस्य अनुजः) वर्णितः। वृत्रासुरस्य वधसमये विष्णुः इन्द्रस्य सहायतां विहितवान्। श्रूयते यद् वृत्रासुरवधसमये इन्द्रः पादविस्ताराय विष्णुं प्रोवाच इति।

अथाब्रवीद् वृत्रमिन्द्रो हनिष्यन्त्सखे विष्णो वितरं विक्रमस्व।। ऋग्वेद-४.१८.११।।

शतपथब्राह्मणानुसारं वृत्रवधसमये विष्णुः इन्द्रेण सह युद्धस्थले एव आसीत्। इन्द्रेण सह मित्रतायाः सत्त्वात् मरुद्गणा अपि अस्य मित्राणि आसन्।

विष्णोः चरित्रस्य एकः विशेषः भवति यत् स गर्भस्य रक्षकः। गर्भाधाननिमित्ताय अन्यैः देवैः सह विष्णोरपि स्तुतिः प्रसिद्धा अस्ति। एतद् अतिरिच्य विष्णुः सर्वदैव परोपकारी शरणागतरक्षकः भक्तवत्सलः दयालुः उदारश्च अस्ति। स एव विश्वं धारयति पालयति च। गिरिक्षितः - इत्याद्युपाधियुक्तः विष्णुः सूर्यस्य प्रतिनिधित्वेनापि वर्णितः। ऋग्वेदे बहुत्र इन्द्रमित्रवरुणादिदेवानां समष्टिरेव विष्णुत्वेन अभिहितः।

इन्द्रं मित्रे वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।

एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।। -(ऋग्वेद- १.१६४.४६)

२०.३) विष्णुसूक्तस्य सारः।

विष्णुः वैदिकदेवेषु अत्यन्तः प्रसिद्धः। अयमेव सर्वेषां चराचरजीवानाम् आधारः। अयं ब्राह्मणप्रियः अतः अस्य वक्षसि ब्राह्मणानां पदाघातस्य लक्षणं विद्यते। अस्यैव उदरात् कमलोत्पत्तिः

जाता यत्र उपविश्य ब्रह्मा ब्रह्माण्डं सृष्टवान्। अस्य पादादेव गङ्गायाः सृष्टिरिति प्रसिद्धिः। अयं च विश्वस्य पालनकर्ता इत्यपि उच्यते। एवं वैदिकदेवेषु अत्यधिकं माहात्म्यं धत्ते अयं प्रसिद्धः विष्णुदेवः इति।

अस्य सूक्तस्य आदावेव श्रुतिः प्रतिजानीते यद् शीघ्रमेव महद्गतियुक्तस्य विष्णोः वीरत्वपूर्णं कार्यं वर्णयामि, कथं स पादत्रयगमनेन समग्रं विश्वं व्याप्तवान्, सज्जनानां कृते उच्चस्थानं निर्मितवान् इत्यादिकञ्च वक्ष्यामि इति। पर्वतस्थः स्वेच्छया गमनवान् भयानकपशुः यथा स्वतन्त्रः तथा अयमपि स्वतन्त्रः अस्यैव त्रिपादभूमिमध्ये सर्वे प्राणिनः जीवन्ति अतः अयं स्तुत्यः। पुण्यात्मानां मिलनस्थानस्य पादत्रयेण व्यापकः उच्चस्थाननिवासी अयं विष्णुः अस्माकं शरणं भवतु, अस्माकम् इच्छां च पूरयतु इति। अस्माकं स्तुतिः पृथिवीजलतेजस्स्वरूपं शाश्वतम् आनन्ददायकम् अकाशस्य तथा विश्वस्य धातारं विष्णुं प्राप्नुयात्। विष्णोः प्रियः लोकः ममापि भवतु यत्र मनुष्याः निरविच्छिन्नम् आनन्दं प्राप्नुवन्ति। विष्णोः लोके जनानां मोदनार्थम् एकः मधुसरोवरः अस्ति अतः निश्चयेन स सर्वेषां मित्रमेव भवति। पत्नी-यजमानौ प्रति उच्यते यत् तयोरपि विष्णुलोकप्राप्तिः भवतु यत्र प्रखरप्रकाशेन सर्वत्र ज्योतिः प्रसृता विद्यते, तथा सर्वेषां मनोरथानां परिपूरकः विष्णुः स्वभासा प्रकाशते इति।

विष्णसूक्तांशे पाठसारः

अस्मिन् पाठे विष्णुसूक्तस्य षट् मन्त्राः सन्ति। अस्मिन् विष्णुसूक्ते ऋषिः वदति सर्वत्र व्यापनशीलस्य विष्णोः वीरकर्माणि शीघ्रं वदामि। यः पृथिवीसम्बद्धानि अग्निवाय्वादीनि निर्मितवान्। यः अतिविस्तीर्णम् अन्तरिक्षं च निर्मितवान् आधाररूपेण। भूमिं विविधरूपेण क्रममाणः सः महद्भिः प्रभूतं गीयते। तादृशस्य विष्णोः वीरकर्माणि वदामि। वीरकर्मणा स्तूयमानः सिंहादिवत् भयानकः, शत्रुवधकर्त्ता, उन्नतवाचि मन्त्रेषु स्थितः, यस्य विष्णोः पादप्रक्षेपैः इदं सर्वं भुवनम् आश्रितं जातं, सः विष्णुः प्रकर्षेण स्तूयते। उन्नतप्रदेशे तिष्ठते बहुभिः गीयमानाय कामानां वर्षित्रे सर्वव्यापकाय विष्णवे अस्मत्कर्मजन्यफलं अस्मत्स्तोत्रजन्यबलं वा अस्तु। यः विष्णुः इदम् अतिविस्तृतं लोकत्रयं अद्वितीयः सन् त्रिभिः पादैः विशेषेण निर्मितवान्। विष्णोः मधुरेण पूर्णेन पादत्रयप्रक्षेपणेन अक्षयरूपेण आश्रितजनाः अन्नेन रक्षिताः। पृथिवीं, द्युलोकं सर्वाणि भुवनानि च पृथिव्यप्तेजोरूपेण धातुत्रयेण धृतवान्। विष्णोः प्रियतमं सर्वैः सेयत्वेन प्रसिद्धं तम् अविनाशिब्रह्मलोकं व्याप्नुयां यस्मिन् च ब्रह्मलोके विष्णुम् आत्मनः इच्छन्तः नराः महतीं तृप्तिमनुभवन्ति। अत्यन्तं क्रममाणस्य विष्णोः उत्कृष्टे स्थाने मधुरनिःस्यन्दो वर्तते। अनेन प्रकारेण सः विष्णुः सर्वेषां बन्धुत्वेन राजते। अन्तिममन्त्रे दम्पतिं प्रति उच्यते अहे दम्पती (यागकर्मणः यजमानौ) युष्मभ्यं प्रसिद्धानि सुखेन उषितुं योग्यानि स्थानानि कामयामहे, तदर्थं विष्णुं प्रार्थयामहे। येषु स्थानेषु रश्मयः अत्युन्नतस्थानाद् गन्तारः स्युः, अस्मिन् स्थाने वास्त्वाधारभूतद्युलोके बहुभिः स्तूयमानस्य कामानां वर्षणशीलस्य विष्णोः तादृशम् उत्कृष्टं स्थानं स्वमहिम्ना स्फुरेत्।

॥मित्रावरुणसूक्तम्॥

प्रस्तावना

प्रस्तुतेऽस्मिन् पाठस्य उत्तरार्धे मित्रावरुणसूक्तम् प्रस्तूयते। वेदोक्तेषु प्रसिद्धेषु सूक्तेषु अन्यतममिदं प्रसिद्धं मित्रावरुणसूक्तम्। वैदिकसाहित्ये मित्रावरुणौ भातृसदृशस्नेहस्य प्रतीकम् अस्ति। वैदिकव्याकरणानुसारेण अर्थात् निरुक्तानुसारेण मित्रावरुणौ वायू इति कथ्यते। मित्रः प्राणरक्षकरूपेण प्रतिपादितः। वरुणश्च जलधारकरूपेण अथवा वृष्टिकारकरूपेण प्रतिपादितः। ऋग्वेदस्य ऐतरेयब्राह्मणग्रन्थानुसारेण मित्रः रात्रिरूपेण वरुणश्च दिनरूपेण प्रतिपादितौ। अस्य मित्रावरुणसूक्तस्य आत्रेयः श्रुतिविद् ऋषिः, मित्रावरुणौ देवौ, त्रिष्टुप् छन्दः।

२०.४) अधुना मूलपाठं पठाम (मित्रावरुणसूक्तम्)

ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्यश्वान्।
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम्॥१॥

तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे।
विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त॥२॥

अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः।
वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू॥३॥

आ वामश्वासः सुयुजो वहन्तु यतरश्मय उप यन्त्वर्वाक्।
घृतस्य निर्णिगनु वर्तते वामुप सिन्धवः प्रदिवि क्षरन्ति॥४॥

अनु श्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा।
नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः॥५॥

अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वन्तः।
राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ॥६॥

हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य१श्वाजनीव।
भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य॥७॥

हिरण्यरूपमुषसो व्युष्टावयः स्थूणमुदिता सूर्यस्य।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च॥८॥

यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा।
तेन नो मित्रावरुणाववविष्टं सिषासन्तो जिगीवांसः स्याम॥९॥

२०.४.१) इदानीं मूलपाठम् अवगच्छाम (मित्रावरुणसूक्तम्)

ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्यश्वान्।
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम्॥१॥

पदपाठः- ऋतेन। ऋतम्। अपिऽहितम्। ध्रुवम्। वाम्। सूर्यस्य। यत्र। विऽमुचन्ति। अश्वान्॥ दश। शता। सह। तस्थुः। तत्। एकम्। देवानाम्। श्रेष्ठम्। वपुषाम्। अपश्यम्॥ १॥

अन्वयः- ऋतेन अपिहितम् ऋतं ध्रुवं वा सूर्यस्य यत्र वाम् अश्वान् विमुचन्ति। दश शता सह तस्थुः तत् एकं देवानां वपुषां श्रेष्ठम् अपश्यम्।

व्याख्या- ऋतेन ऋतमिति नवर्चं षष्ठं सूक्तमात्रेयस्य श्रुतविद आर्षं त्रैष्टुभं मैत्रावरुणम्। तथा चानुक्रम्यते- ' ऋतेन नव श्रुतविन्मैत्रावरुणं वै तत् ' इति। वै-तदित्युभयोः प्रयोगात् तुह्यादिपरिभाषयैतदादीन्येकादशसूक्तानि मित्रावरुणदेवत्यानि। विनियोगो लैङ्गिकः।

सूर्यस्य ऋतं सत्यभूतं मण्डलम् ऋतेन उदकेन अपिहितम् आच्छादितं ध्रुवं शाश्वतम् अपश्यम् इति सम्बन्धः। यत्र वां युवयोः स्थितिस्तदित्यर्थः। सूर्यमण्डले मित्रावरुणयोः स्थितिः 'चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः', 'उद्वां चक्षुर्वरुण सुप्रतीकं देवयोः', 'चक्षुर्मित्रस्य वरुणस्य' इत्यादिषु प्रसिद्धा। यत्र यस्मिन् मण्डले स्थितान् अश्वान् विमुचन्ति विमोचयन्ति स्तोतारः। मन्देहादिभिर्निरुद्धानित्यर्थः। अथवा शीघ्रधावनाय स्तुत्या प्रेरयन्ति। यस्मिंश्च मण्डले दश शता शतानि सहस्रसंख्यका रश्मयः तस्थुः तिष्ठन्ति तादृशं देवानां वपुषां वपुष्मतां तेजोवताम् अग्न्यादीनां श्रेष्ठं प्रशस्यतमम्। मत्वर्थलक्षणा। अथवा व्यधिकरणषष्ठी। देवानां वपुषां शरीराणां श्रेष्ठम्। मण्डलं हि सूर्यस्य

वपुःस्थानीयम्। तन्मण्डलम् अपश्यम्। अथवा वां युवयोर्मध्ये सूर्यस्य मण्डलमपश्यमिति व्याख्येयं 'मैत्रं वा अहः' इति श्रुतेर्मित्रस्यैव सूर्यत्वादित्याशयेन।

सरलार्थः- जलेन आच्छादितं शाश्वतं सूर्यस्य मण्डलम् अहं पश्यामि। यत्र युवयोः अश्वसमूहान् स्तोतारः विमोचयन्ति। यत्र च सहस्ररश्मयः मिथः अवतिष्ठन्ते। देवानाम् एकां श्रेष्ठमूर्तिम् अहं पश्यामि।

व्याकरणम्-

- ऋतेन- ऋतशब्दस्य तृतीयैकवचने ऋतेन इति रूपम्।
- अपिहितम्- अपिपूर्वकधा-धातोः क्तप्रत्यये विकल्पेन पिहितम् इति रूपम्। 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इति न्यायेन अपीति उपसर्गस्य अकारलोपः विकल्पेन भवति। तेन पिहितम् अपिहितं च इति रूपद्वयं भवति।
- विमुचन्ति- विपूर्वकमुच्-धातोः लट्-लकारे प्रथमपुरुषबहुवचने विमुचन्ति इति रूपम्।
- तस्थुः- स्था-धातोः लिट्-लकारे प्रथमपुरुषबहुवचने तस्थुः इति रूपम्।
- वपुषाम्- वपुष्-शब्दस्य षष्ठीबहुवचने वपुषाम् इति रूपम्।
- अपश्यम्- दृश्-धातोः लङ्-लकारे उत्तमपुरुषैकवचने अपश्यम् इति रूपम्।

तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे।
विश्वा पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त॥२॥

पदपाठः- तत्। सु। वाम्। मित्रावरुणा। महित्वम्। ईर्मा। तस्थुषीः। अहऽभिः। दुदुह्रे॥
विश्वाः। पिन्वथः। स्वसरस्य। धेनाः। अनु। वाम्।एकः। पविः। आ। ववर्त॥२॥

अन्वयः - मित्रावरुणा वां तत् महित्वं सु ईर्मा अहोऽभिः तस्थुषीः दुदुह्रे स्वसरस्य विश्वाः धेनाः पिन्वथः अनु वाम् एकः पविः आववर्त।

व्याख्या- हे मित्रावरुणा वां युवयोः तत् महित्वं महत्त्वं सु सुष्ठु, अतिप्रशस्तमित्यर्थः। किं तदित्युच्यते। ईर्मा सततगन्ता सर्वस्य प्रेरको वादित्यः अहभिः अहोभिर्वर्षर्तुसम्बन्धिभिः तस्थुषीः स्थावरभूता अपो दुदुहे दुग्धे। किञ्च स्वसरस्य स्वयं सर्तुरादित्यस्य विश्वाः सर्वाः धेनाः लोकानां प्रीणयित्रीर्द्युतीः पिन्वथः वर्धयथः। वां युवयोः एकः अप्रतियोगी पविः। पविरिति रथस्य नेमिः 'पवी रथनेमिर्भवति' इति यास्कवचनात्, तथाप्यत्र लक्षितलक्षणया रथे वर्तते, केवलचक्रस्यावर्तनायोगात्। युवयोरेको रथः अन्वाववर्त अनुक्रमेण परिभ्रमति।

सरलार्थः- हे मित्रावरुणौ युवयोः उभयोः स महिमा अतिशयेन प्रशस्तः। सततगमनशीलः यः सूर्यः स नित्यगमनेन स्थितजलसमूहं दोग्धि। युवां परिभ्रमतः सूर्यस्य सकलकिरणसमूहस्य वर्धनम् अकुरुतम्। एकनेमिरथः युवयोः अनुग्रहेण आवर्तते।

व्याकरणम्-

- मित्रावरुणा- मित्रश्च वरुणश्चेति मित्रावरुणौ इति द्वन्द्वसमासः।
- तस्थुषीः- स्था-धातोः क्वसुन्प्रत्यये स्त्रियाम् ङीप्प्रत्यये द्वितीयाबहुवचने तस्थुषीः इति रूपम्।
- अहभिः- अहन्-शब्दस्य तृतीयाबहुवचने अहभिः इति रूपम्।
- दुदुह्रे- दुह्-धातोः लिट्-लकारे आत्मनेपदे प्रथमपुरुषबहुवचने दुदुह्रे इति रूपम्।
- धेनाः-धे-धातोः शब्दस्यास्य निष्पत्तिः। धेनाशब्दस्य द्वितीयाबहुवचने धेनाः इति रूपम्।
- पविः- पू-धातोः 'अच इः' इति औणादिकसूत्रेण इप्रत्यये पविः इति रूपम्।
- आववर्त- आपूर्वकवृत्-धातोः लिट्-लकारे प्रथमाबहुवचने आववर्त इति रूपम्।

अधा॑रयतं पृथि॒वीमु॒त द्यां मि॒त्रराजाना वरुणा॒ महो॑भिः।
व॒र्धय॑त॒मोष॑धी॒: पिन्व॑त॒ं गा अव॑ वृ॒ष्टिं सृ॑जतं जीरदानू॥३॥

पदपाठः– अधा॑रयतम्। पृ॒थि॒वीम्। उ॒त। द्याम्। मित्र॑ऽराजाना। व॒रु॒णा॒। मह॑ःऽभिः॥
व॒र्धय॑तम्। ओष॑धीः। पिन्व॑तम्। गाः। अव॑। वृ॒ष्टिम्। सृ॒ज॒त॒म्। जी॒र॒दा॒नू॒ इति॑ जीरदानू॥
३॥

अन्वयः- मित्रराजाना वरुणा महोभिः पृथिवीम् उत द्याम् अधारयतम्। ओषधीः वर्धयतं, गाः पिन्वतं जीरदानू वृष्टिम् अवसृजतम्।

व्याख्या- हे मित्रराजाना मित्रभूताः स्तोतारो राजानः स्वामिन ईश्वरा भवन्ति ययोरुपासनावशात् तौ मित्रराजानौ। हे वरुणा। प्रतियोग्यपेक्षया द्विवचनम्। अत्र पादादित्वादाद्यं पदं न निहन्यते। हे देवौ, महोभिः तेजोभिः स्वसामर्थ्यैः पृथिवीम् उत अपि च द्याम् अधारयतम्। हे देवौ, युवाम् ओषधीः वर्धयतम् वृष्टिप्रेरणेन। गाः पिन्वतम् गवाश्वादीन् वर्धयतम्। तदर्थं वृष्टिम् अवसृजतम् अवाङ्मुखं प्रेरयतं हे जीरदानू क्षिप्रदानौ।

सरलार्थः- हे राजद्वय, मित्र वरुण च युवां तेजसा पृथिवीं द्युलोकं च धारयथः। युवां औषधसमूहं वर्धयतं, गवादपशून् वर्धयतम्। किञ्च हे क्षिप्रदानौ, युवां वृष्टिप्रेरणं कुरुतम्।

व्याकरणम्-

- अधारयतम्- धृ-धातोः णिचि लङ्-लकारे मध्यमपुरुषद्विवचने अधारयतम् इति रूपम्।
- महोभिः- महस्-शब्दस्य तृतीयाबहुवचने महोभिः इति रूपम्।
- वर्धयतम्- वृध्-धातोः णिचि लोट्-लकारे मध्यमपुरुणद्विवचने वर्धयतम् इति रूपम्।
- पिन्वतम्- पिव्-धातोः लोट्-लकारे मध्यमपुरुषद्विवचने पिन्वतम् इति रूपम्।
- जीरदानू- जीरं दानू ययोस्तौ इति बहुव्रीहिसमासे जीरदानू इति रूपम्।

आ वा॒मश्वा॑सः सु॒युजो॑ वहन्तु य॒तर॑श्मय॒ उप॑ यन्त्व॒र्वाक्।
घृ॒तस्य॑ नि॒र्णिगनु॑ वर्तते वा॒मुप॒ सिन्ध॑वः प्र॒दिवि॑ क्षरन्ति॥४॥

पदपाठः– आ। वा॒म्। अश्वा॑सः। सु॒ऽयुज॑ः। व॒ह॒न्तु॒। य॒तऽर॑श्मय॒ः। उप॑। य॒न्तु॒। अ॒र्वाक्॥
घृ॒तस्य॑। नि॒ःऽनिक्। अनु॑। व॒र्त॒ते॒। वा॒म्।उप॑। सिन्ध॑वः। प्र॒ऽदिवि॑।क्ष॒र॒न्ति॒॥४॥

अन्वयः- सुयुजः अश्वासः वाम् आवहन्तु यतरश्मयः अर्वाक् उपयन्तु घृतस्य निर्णिक वाम् अनुवर्तते। प्रदिवि सिन्धवः उपक्षरन्ति।

व्याख्या- हे मित्रावरुणौ वां युवाम् अश्वासः अश्वाः सुयुजः सुष्ठु रथे युक्ताः सन्तः आवहन्तु। यतरश्मयः सारथिनियतप्रग्रहास्ते अर्वाक् उपयन्तु। घृतस्य उदकस्य निर्णिक् रूपं वाम् अनुवर्तते अनुगच्छति। किञ्च प्रदिवि। पुराणनामैतत्। पुराणाः सिन्धवः उपक्षरन्ति उपगच्छन्ति, युवयोरनुग्रहात्।

सरलार्थः- अश्वाः सुसज्जताः सन्तः युवां वहन्तु। संयतरश्मयः ते अत्र तिष्ठन्तु। जलस्य धारा इव ते युवाम् अनुसरन्ति। प्राचीनकालतः नद्यः प्रवहन्ति।

व्याकरणम्-

- वहन्तु- वह्-धातोः लोट्-लकारे प्रथमपुरुषबहुवचने वहन्तु इति रूपम्।
- यतरश्मयः- यताः रश्ययः येषां ते यतरश्मयः इति बहुव्रीहिसमासः।
- निर्णिक्- निर्पूर्वकनिज्-धातोः क्विप्प्रत्यये निर्णिज्-शब्दः निष्पन्नः। तस्य प्रथमैकवचने निर्णिक् इति रूपम्।
- प्रदिवि- प्रपूर्वकदिव्-धातोः क्विप्प्रत्यये प्रदिव्-शब्दः निष्पन्नः। तस्य सप्तम्येकवचने प्रदिवि इति रूपम्।
- क्षरन्ति- क्षर्-धातोः लट्-लकारे प्रथमपुरुषबहुवचने क्षरन्ति इति रूपम्।

पाठगतप्रश्नाः

१६. मित्रावरुणसूक्तस्य कः ऋषिः, के देवते, किं छन्दः।
१७. ऋतम् इत्यस्य कः अर्थः।
१८. अपिहितम् इत्यस्य कः अर्थः।
१९. ऋतेन इत्यत्र ऋतशब्दस्य कः अर्थः।
२०. तस्थुः इति रूपं कथं सिद्ध्येत्।
२१. ईर्मा इत्यस्य कः अर्थः।
२२. तस्थुषीः इत्यत्र कः प्रत्ययः।
२३. पविः इति रूपं कथं सिद्ध्येत्।

२४. धेनाः इति शब्दः कस्मात्धातोः निष्पन्नः।
२५. जीरदानू इत्यस्य विग्रहं समासं च लिखत।
२६. जीरदानू इति शब्दस्य कः अर्थः।
२७. पिन्वतम् इति कस्मात्धातोः निष्पन्नः।
२८. अश्वासः इत्यस्य लौकिकं रूपं किम्।
२९. अधारयतम् इति रूपं कथं सिद्ध्येत्।
३०. निर्णिक् इति रूपं कथं सिद्ध्येत्।

अनु श्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा।
नमस्वन्ता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वन्तः॥५॥

पदपाठः– अनु। श्रुताम्। अमतिम्। वर्धत्। उर्वीम्। बर्हिःऽइव। यजुषा। रक्षमाणा॥

नमस्वन्ता। धृतऽदक्षा। अधि। गर्ते। मित्र। आसाथे इति। वरुण। इळासु। अन्तरिति॥

५॥

अन्वयः- श्रुताम् अमतिम् अनुवर्धत्। बर्हिः यजुषा उर्वीं रक्षमाणा नमस्वन्ता धृतदक्षा मित्र वरुण इळासु अन्तः गर्ते अधि आसाथे।

व्याख्या- श्रुताम् विश्रुताम् अमतिम्। रूपनामैतत्। शरीरदीप्तिमित्यर्थः। ताम् अनुवर्धत् अनुवर्धयन्तौ। बर्हिः यज्ञः। स इव स यथा यजुषा मन्त्रेण रक्ष्यते तद्वत् उर्वी रक्षमाणा पालयन्तौ नभस्वन्ता अन्नवन्तौ हे धृतदक्षा आत्तबलौ हे मित्र हे वरुण हे मित्रावरुणौ युवामुक्तलक्षणौ सन्तौ इळासु यागभूमिषु अन्तः मध्ये गर्ते अधि रथे आसाथे उपविशथः। "रथोऽपि गर्त उच्यते" (नि० ३।५) इति यास्कः। "आ रोहथो वरुण मित्र गर्तम्" (ऋ० सं० ५।६२।८) इति।

सरलार्थः- हे मित्रवरुणौ युवां विशेषशरीरदीप्तिं वर्धयतम्। यथा यज्ञीयकुशाः यज्ञे यजुर्मन्त्रैः रक्षिताः भवन्ति तथैव पृथिव्याः रक्षकौ युवाम् अन्नेन बलवन्तौ भूत्वा यज्ञभूमेः मध्यस्थलस्थरथे उपविशतम्।

व्याकरणम्-

- वर्धत्- वृध्-धातोः शतृप्रत्यये नपुंसकलिङ्गे प्रथमैकवचने वर्धत् इति रूपम्।
- उर्वीम्- उरुशब्दात् स्त्रीप्रत्यये उर्वीशब्दः निष्पन्नः। तस्य द्वितीयैकवचने उर्वीम् इति रूपम्।
- यजुषा- यजुष्-शब्दस्य तृतीयैकवचने यजुषा इति रूपम्।

- धृतदक्षा- धृतः दक्षः ययोस्तौ धृतदक्षौ इति बहुव्रीहिसमासः। सम्बद्धौ प्रथमायाः द्विवचने आकारः।
- आसाथे- आस्-धातोः आत्मनेपदे लट्-लकारे मध्यमपुरुषद्विवचने आसाथे इति रूपम्।

अक्र॑विहस्ता सुकृते॑ पर॒स्पा यं त्रासा॑थे वरुणेळा॑स्वन्तः।
राजा॑ना क्षत्रमहृ॑णीयमाना सहस्र॑स्थूणं बिभृथः सह द्वौ॥६॥

पदपाठः- अक्र॑विऽहस्ता। सुऽकृते॑। परःऽपा। यम्। त्रासा॑थे इति॑। वरुणा। इळा॑सु।
अन्तरिति॑॥ राजा॑ना। क्षत्रम्। अहृ॑णीयमाना। सहस्र॑ऽस्थूणम्। बिभृथः। सह।द्वौ॥६॥

अन्वयः- वरुणा! युवां यम् इळासु अन्तः त्रासाथे सुकृते अक्रविहस्ता परस्पा। राजाना अहृणीयमाना द्वौ सह क्षत्रम् सहस्रस्थूणं विभृथः।

व्याख्या- अक्रविहस्ता अकृपणहस्तौ दानशूरावित्यर्थः। कस्मै। सुकृते शोभनस्तुतिकर्त्रे। परस्पा परस्तात् पातारौ रक्षितारौ हे वरुणा मित्रावरुणौ युवां यं यजमानम् इळासु यागभूमिषु अन्तः मध्ये त्रासाथे रक्षथः तस्मै सुकृते अक्रविहस्ता परस्पा च भवथ इति सम्बन्धः। किञ्च युवां राजाना राजमानौ अहृणीयमाना अक्रुध्यन्तौ द्वौ परस्परं सह साहित्येन क्षत्रं धनं सहस्रस्थूणम् अनेकावष्टम्भकस्तम्भोपेतं सौधादिरूपं गृहं च बभृथः धारयथः। सुकृते यजमानाय। अथवा क्षत्रं बलम् अपरिमिताभिः स्थूणाभिरुपेतं रथं चागमनार्थं सह धारयथः।

सरलार्थः- हे मित्रावरुणौ युवां यं यजमानं यज्ञभूमेः मध्यभागे रक्षथः, तं स्तुतिकारिणः यजमानं प्रति अकृपणहस्तौ तस्य पालनकारिणौ भवतम्। हे राजद्वय, युवां क्रोधहीनौ भूत्वा एकत्रीभूतशक्त्या सहस्रस्तम्भयुक्तस्थूणं धारयतम्।

व्याकरणम्-

- अक्रविहस्ता- न क्रविः अक्रविः, अक्रवी हस्तौ ययोस्तौ अक्रविहस्तौ इति बहुव्रीहिः, सुपः डादेशः।
- सुकृते- शोभनं करोति इति विग्रहे सुपूर्वककृ-धातोः क्विप्प्रत्यये सुकृत् इति शब्दः निष्पन्नः। तस्य चतुर्थ्येकवचने सुकृते इति रूपम्।
- अहृणीयमाना- हृणीङ्-धातोः शानच्प्रत्यये हृणीयमाना इति रूपम्। न हृणीयमाना अहृणीयमाना इति नञ्समासः।
- सहस्रस्थूणम्- सहस्रं स्थूणाः यस्य तं सहस्रस्थूणम् इति बहुव्रीहिसमासः।
- विभृथः- भृ-धातोः परस्मैपदे लट्-लकारे मध्यमपुरुषद्विवचने विभृथः इति रूपम्।

हिर॑ण्यनिर्णि॒गयो॑ अस्य स्थूणा वि भ्रा॑जते दिव्य१श्वाज॑नीव।
भद्रे क्षेत्रे निमि॑ता तिल्वि॑ले वा सनेम मध्वो अधि॑गर्त्यस्य॥७॥

पदपाठः- हिरण्यनिर्णिक्। अयः। अस्य। स्थूणा। वि। भ्राजते। दिवि। अश्वाजनीऽइव॥ भद्रे। क्षेत्रे। निऽमिता। तिल्विले। वा। सनेम। मध्वः। अधिऽगर्त्यस्य॥७॥

अन्वयः- हिरण्यनिर्णिक् अस्य स्थूणाः अयः, दिवि अश्वाजनीव विभ्राजते। भद्रे क्षेत्रे तिल्विले वा निमिता, मध्वः गर्तस्य अधि सनेम।

व्याख्या- अनयो रथो हिरण्यनिर्णिक् हिरण्यरूपः। निर्णिगिति रूपनाम। अस्य रथस्य स्थूणा कीलकादयः। अयः। हिरण्यनामैतत्। अयोविकारा इत्यर्थः। अयोमया वा। तादृशो रथो दिवि अन्तरिक्षे विभ्राजते। किमिव। अश्वाजनीइव। अश्वा व्यापनशीला मेघाः। तानजति गच्छतीत्यश्वाजनी विद्युत्। सेव दिवि भ्राजते। किञ्च भद्रे कल्याणे स्तुत्ये वा क्षेत्रे देवयजने तिल्विले वा। वाशब्दश्चार्थे, तिल स्नेहने (धा० ६।७६, १०।७३)। तिलुः स्निग्धा इला भूमिर्यस्य तत् क्षेत्रं तिल्विलं देवयजनम्। घृतसोमादिना स्निग्धे भद्रे च क्षेत्रे निमिता स्थूणा यूपयष्टिरिव स्थितः। मध्वः मधुपूर्णं गर्तस्य गर्तं रथं सनेम सम्भजेम। कर्मणि षष्ठ्यौ। अधीति पूरणः। अथवा गर्तस्याधि रथस्योपरि मध्वः मधु सोमरसं सनेम स्थापयेमेत्यर्थः।

सरलार्थः- हिरण्यनिर्मिताः अनयोः रथस्य स्थूणाः लौहनिर्मिताः। स रथः विद्युत् इव अन्तरिक्षलोके शोभितः भवति। कल्याणकारके स्थाने अथवा देवपूजितस्थाने निश्चलस्तम्भ इव मधुमयरथस्योपरि अवतिष्ठामः।

व्याकरणम्-

- हिरण्यनिर्णिक्- हिरण्यस्य निर्णिक् इव निर्णिक् यस्य तत् हिरण्यनिर्णिक् इति बहुव्रीहिसमासः।
- भ्राजते- भ्राज्-धातोः लट्-लकारे आत्मनेपदे प्रथमपुरुषैकवचने भ्राजते इति रूपम्।
- निमिता- निपूर्वकमि-धातोः क्तप्रत्यये सुपः डादेशे च निमिता इति रूपम्।
- अधिगर्त्यस्य- गर्ते इति अधिगर्तम् इति अव्ययीभावसमासः, अधिगर्ते भवः इति अधिगर्त्यः, तस्य अधिगर्त्यस्य।

हिरण्यरूपमुषसो व्युष्टावयः स्थूणमुदिता सूर्यस्य।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च॥८॥

पदपाठः- हिरण्यऽरूपम्। उषसः। विऽउष्टौ। अयःऽस्थूणम्। उत्ऽइता। सूर्यस्य॥ आ। रोहथः। वरुण। मित्र। गर्तम्। अतः। चक्षाथे इति। अदितिम्। दितिम्। च॥८॥

अन्वयः- वरुण मित्र उषसः व्युष्टौ सूर्यस्य उदिता हिरण्यरूपम् अयःस्थूणं गर्तम् आरोहथः। अतः अदितिं दितिं च चक्षाथे।

व्याख्या- उषसः व्युष्टौ प्रातःकाले इत्यर्थः। सूर्यस्य उदिता उदितावुदये। स एव कालः प्रकारान्तरेणोक्तः। तस्मिन् काले हिरण्यरूपम् अयःस्थूणम् अयोमयशङ्कुं गर्तं रथं हे वरुण हे मित्र युवां गर्तम् आरोहथः यज्ञं प्राप्तुम्। अतः अस्माद्धेतोः अदितिम् अखण्डनीयां भूमिं दितिं खण्डितां प्रजादिकां च चक्षाथे पश्यथः।

सरलार्थः- हे मित्रवरुणौ युवां उषायाः प्रारम्भे सूर्यस्य उदये सति हिरण्यनिर्मिते लौहदण्डयुक्ते रथे आरोहणं कुरुतम्। किञ्च अदितिं दितिं च अवलोकयतम्।

व्याकरणम्-

- व्युष्टौ- विपूर्वकोच्छ-धातोः क्तिन्प्रत्यये व्युष्टि इति रूपम्। तस्य सप्तम्येकवचने व्युष्टौ इति रूपम्।
- आरोहथः- आङ्पूर्वकरुह्-धातोः लट्-लकारे मध्यमपुरुषद्विवचने आरोहथः इति रूपम्।
- चक्षाथे- चक्ष्-धातोः लट्-लकारे मध्यमपुरुषद्विवचने चक्षाथे इति रूपम्।

यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा।
तेन नो मित्रावरुणावविष्टं सिषासन्तो जिगीवांसः स्याम॥९॥

पदपाठः- यत्। बंहिष्ठम्। न। अतिऽविधे। सुदानू इति सुऽदानू। अच्छिद्रम्। शर्म। भुवनस्य। गोपा॥ तेन। नः। मित्रावरुणौ। अविष्टम्। सिषासन्तः। जिगीवांसः। स्याम॥९॥

अन्वयः- मित्रावरुणौ! सुदानू भुवनस्य गोपा वंहिष्ठं यत् अच्छिद्रं न अतिविधे शर्म नः अविष्टं सिषासन्तः जिगीवांसः स्याम।

व्याख्या- दाक्षायणयज्ञे 'यद् बंहिष्ठम्' इति नवमी द्वितायस्याममावास्यायां मैत्रावरुणस्य हविषो याज्या। सूत्रितञ्च 'आ नो मित्रावरुणा यद्' बंहिष्ठं नातिविधे सुदानू (आ० श्रौ० २।१४।११) इति। मैत्रावरुणे पशौ हविष एषैव याज्या। सूत्रितञ्च 'यद्बंहिष्ठं नातिविधे सुदानू हिरण्यगर्भः समवर्तताग्रे' (आ० श्रौ० ३।८।१) इति।

हे सुदानू शोभनदानौ, हे भुवनस्य गोपा, युवां बंहिष्ठं बहुलतमं यत् अच्छिदम् अनवच्छिन्नं शर्म सुखं गृहं वा नातिविधे अतिवेद्धुमशक्यं शर्म इति शर्मविशेषणम्। तादृशं शर्म धारयथः तेन शर्मणा नः अस्मान् अविष्टं रक्षतम्। हे मित्रावरुणौ सिषासन्तः धनानि सम्भक्तुमिच्छन्तो वयं जिगीवांसः शत्रूणां धनानि जेतुमिच्छन्तः स्याम भवेम।

सरलार्थः- हे दानशीलौ विश्वस्य रक्षकौ मित्रवरुणौ युवां द्वौ महत्तमौ, छेदहीनेन तथा क्षतिहीनेन सुखेन अस्माकं रक्षतम्। एवम् अभीप्सितधनयुक्ताः भूत्वा वयं यथा शत्रुविजयिनौ भवेमः।

व्याकरणम्-

- बंहिष्ठम्- बहुलशब्दात् इष्ठन्प्रत्यये बहुलस्थाने बंहादेशे द्वितीयैकवचने बंहिष्ठम् इति रूपम्।
- सुदानू- सु(शोभनम्) दानु ययोस्तौ सुदानू इति बहुव्रीहिसमासः।
- अच्छिद्रम्- अविद्यमानं छिद्रं यस्मिन् तत् अच्छिद्रम् इति बहुव्रीहिसमासः।
- शर्म- शृणाति हिनस्ति दुःखमिति शर्म।
- सिषासन्तः- सन्-धातोः सन्-प्रत्यये शतृप्रत्यते कृते प्रथमाबहुवचने सिषासन्तः इति रूपम्।
- जिगीवांसः- जि-धातोः क्वसुन्प्रत्यये प्रथमाबहुवचने जिगीवांसः इति रूपम्।
- स्याम- अस्-धातोः विधिलिङि उत्तमपुरुषबहुवचने स्याम इति रूपम्।

पाठगतप्रश्नाः

३१. बर्हिः इति शब्दस्य कः अर्थः।

३२. उर्वीशब्दस्य कः अर्थः।

३३. इळासु इत्यस्य कः अर्थः।

३४. धृतदक्षा इत्यस्य कः विग्रहः कश्च समासः।

३५. आसाथे इति रूपं कथं सिद्ध्येत्।

३६. अक्रविहस्ता इत्यस्य कः अर्थः।

३७. अक्रविहस्ता इत्यस्य कः विग्रहः कश्च समासः।

३८. सहस्रस्थूणम् इत्यस्य कः विग्रहः कश्च समासः।

३९. निर्णिगिति किम्।

४०. किं तिल्विलम्।

४१. तिल्विलम् इत्यस्य कः विग्रहः।

४२. अधिगर्त्यः इति रूपं कथं सिद्ध्येत्।

४३. सुदानू इत्यस्य कः अर्थः।

४४. बंहिष्ठम् इत्यस्य कः अर्थः।

४५. शर्म इत्यस्य कः अर्थः।

२०.५) मित्रावरुणस्वरूपम्

वैदिकयुगे प्रसिद्धासु देवतासु अन्यतमा हि वरुणदेवता। वैदिकदेवतामण्डलेषु विशिष्टं स्थानम् एकम् अलङ्करोति अयं वरुणः। तथापि वरुणदेवम् उद्दिश्य केवलं द्वादश सूक्तानि एव सम्पूर्णे ऋग्वेदे निवेदितानि। आच्छादनार्थकात् वृधातोः वरुणशब्दो निष्पन्नः। अत एव भगवान् यास्कः उक्तवान् - वरुणो वृणोतीति सतः। अर्थात् मेघद्वारा इयं देवता आकाशम् आवृणोति, तस्मात् अस्या नाम वरुणः इति।

अथर्ववेदस्य भाष्ये सायणाचार्यः - वरुणः रात्र्यभिमानिनी देवता इति वर्णितवान्। मित्रशब्दस्य व्युत्पत्तिदर्शनावसरे भगवान् यास्कः उक्तवान् - मित्रः प्रमीतेस्त्रायते इति। अर्थात् मित्रः प्रमीतेः मरणात् वर्षणद्वारा निखिलजनान् त्रायते। अन्यत्र पुनः तेनैव उक्तम् - मित्रः जलं प्रक्षिपन् अन्तरिक्षलोकं गच्छति इति। मित्रो हि जलवर्षणकारिणी देवता इति यास्कव्याख्यानात् ज्ञायते। मित्रः वरुणश्च यथाक्रमं दिनस्य रात्रेश्च अभिमानिन्यौ देवते इति आचार्यः सायणः उक्तवान्। तस्य उक्तिर्हि - मित्रः अहरभिमानिनी देवता वरुणः रात्र्यभिमानिनी। मैत्रं वा अहः वारुणी रात्रिः इति श्रुतिः। ऋग्वेदे मित्रस्य वरुणस्य च सम्मिलिततया बहवः स्तवाः वर्तन्ते। एतौ द्वौ युग्मतया मित्रावरुणौ इत्युच्येते। मित्रः वरुणश्च उभयौ सूर्यरूपेण एव ग्राह्यौ, यतो हि सूर्य एव दिवारात्र्यौः स्रष्टा। सूर्यरश्मिः मेघं सृजति, आकाशं च मेघावृतं करोति। अयं मेघः अथवा अन्धकारः एव वरुणस्य पाशस्वरूपः वर्तते। यस्मिन् सूर्यमण्डले मित्रावरुणयोः अवस्थितिः वर्तते, तन्मण्डलं सदा सत्यावृतं भवति। तत्स्थानात् एव ऋत्विजः अश्वगणान् अर्थात् सूर्यरश्मीन् विमोचयन्ति।

मित्रावरुणौ यत्र वसतः, तस्मिन् स्थाने प्रायः दशसहस्राणि रश्मयः समवेततया अवतिष्ठन्ते। मित्रावरुणयोः माहात्म्यात् एव निरन्तरभ्रमणरतः सूर्यः दैनिकगत्या बद्धान् जलराशीन् आकर्षयितुं समर्थो भवति। एतौ देवौ स्वयं भ्रमतः सूर्यस्य प्रीतिदायकान् दीप्तिसमूहान् वर्धयतः। एतयोः उभयोः एक एव रथः स च निरन्तरं भ्रमति। मित्रावरुणौ स्वसामर्थ्यवशात् इमां पृथिवीं स्वर्गं च धारयतः। जलसमूहः विग्रहं धारयित्वा एतयोः अनुसरणं करोति, किञ्च पुरातनाः नद्यः एनयोः अनुग्रहात् पुनः प्रवहन्ति। मित्रावरुणयोः रथः सुवर्णनिर्मितः वर्तते। अयं रथः अन्तरिक्षे विद्युत् इव शोभमानो वर्तते। प्रत्यूषसि मित्रावरुणौ सूर्योदयात् परं लोहकीलकसमन्वितसुवर्णरथे आरुह्य अदितिं दितिं च अवलोकेते। दानशीलौ विश्वरक्षकौ एतौ मित्रावरुणौ निरवच्छिन्नसुखस्य प्रदाने समर्थौ।

२०.६) मित्रावरुणसूक्तस्य सारः

मित्रः वरुणश्च यथाक्रमं दिनस्य रात्रेश्च अभिमानिन्यौ देवते इति आचार्यः सायणः उक्तवान्। तस्य उक्तिर्हि - 'मित्रः अहरभिमानिनी देवता वरुणः रात्र्यभिमानिनी। मैत्रं वा अहः वारुणी रात्रिः' इति। ऋग्वेदे मित्रस्य वरुणस्य च सम्मिलिततया बहवः स्तवाः वर्तन्ते। एतौ द्वौ युग्मतया मित्रावरुणौ इत्युच्येते। मित्रः वरुणश्च उभौ सूर्यरूपेण एव ग्राह्यौ, यतो हि सूर्य एव दिवारात्र्यौः स्रष्टा। आत्रेय-ऋषिदृष्टे मित्रावरुणसूक्ते तावत् तयोः वर्णनं विहितम्। ऋतेन आच्छादितं मित्रावरुणयोः वासस्थानभूतं सूर्यमण्डलम् अहम् अपश्यम्। तत्र स्थितान् अश्वसमूहान् उपासकाः स्तोत्रेण विमोचयन्ति। प्रायः दशसहस्रं रश्मयः समवेततया तस्मिन् स्थले अवतिष्ठन्ते। देवानां रूपसमूहेषु श्रेष्ठं रूपम् अहम् अपश्यम् - इति यजमानः स्तौति। मित्रावरुणयोः माहात्यम् अतिप्रशस्तं, यद्वशात् एव निरन्तरभ्रमणरतः सूर्यः दैनिकगत्या बद्धान् जलराशीन् आकर्षयितुं समर्थो भवति। एतौ देवौ स्वयं भ्रमतः सूर्यस्य प्रीतिदायकान् दीप्तिसमूहान् वर्धयतः। एतयोः उभयोः समान एव रथः निरन्तरं भ्रमति। ये तु मित्रावरुणयोः स्तुतिं कुर्वन्ति, ते स्तोतारः एतयोः अनुग्रहात् राजपदं लभन्ते। स्वसामर्थ्यवशात् इमां पृथिवीं स्वर्गं च धारयतः इमौ देवौ। यजमानः प्रार्थयति यत् - हे क्षिप्रदातारौ! भवन्तौ ओषधीन् गोसमूहान् च वर्धयताम्, वर्षणं च कुरुताम्।

निपुणतया रथे योजिताः भवतोः अश्वगणाः भवन्तौ वहन्तु इति। जलसमूहः विग्रहं धारयित्वा मित्रावरुणयोः अनुसरणं करोति, किञ्च पुरातनाः नद्यः एनयोः अनुग्रहात् पुनः प्रवहन्ति।

यजमानः प्रार्थयति यत् - हे अन्नसम्पन्नौ बलशालिनौ मित्रावरुणौ! भवन्तौ सुप्रसिद्धाः स्वशरीरदीप्तीः वर्धयित्वा, मन्त्ररक्षितयज्ञवत् सम्पूर्णां पृथिवीम् इमां संरक्ष्य यज्ञभूमेः मध्यस्थे रथे आरोहणं कुरुताम् इति। यज्ञभूमौ भवन्तौ यं यजमानं रक्षतः, शोभनस्तुतिकारिणं तं प्रति भवन्तौ दानशालिनौ भवताम्। यतो हि भवन्तौ उभौ क्रोधविहीनौ सन्तौ धनं सहस्रस्तम्भसमन्वितं सौधं च धारयतः इति।। मित्रावरुणयोः रथः सुवर्णनिर्मितः वर्तते। अयं रथः अन्तरिक्षे विद्युत् इव शोभमानो वर्तते। वयं यजमानाः यथा उपयुक्तस्थाने यूपयष्टिसमन्वितायां यज्ञभूमौ रथोपरि सोमरसं स्थापयितुं समर्थाः भवेम तादृशम् अनुग्रहं भवन्तौ कुरुताम् इति प्रार्थना। दानशीलौ विश्वरक्षकौ एतौ मित्रावरुणौ निरवच्छिन्नसुखस्य प्रदाने समर्थौ। प्रत्यूषसि मित्रावरुणौ सूर्योदयात् परं लोहकीलकसमन्वितसुवर्णरथे आरुह्य अदितिं दितिं च अवलोकेते। मित्रावरुणौ निरवच्छिन्नस्य निरतिशयस्य च सुखस्य प्रदाने समर्थौ। अतः यजमानः प्रार्थयति यत् - भवन्तौ अस्मभ्यं तादृशं सुखं प्रयच्छताम् इति।

मित्रावरुणसूक्तांशे पाठसारः

अस्मिन् पाठे द्वे सूक्ते आलोचिते। तयोः विष्णुसूक्तस्य सारादिकम् पूर्वार्धे विद्यते। उत्तरार्थे तु मित्रावरुणसूक्तम् आलोचितम्। अतः तस्य संक्षेपेण सारोऽत्र प्रदीयते।

आदिमसूक्तं मित्रावरुणसूक्तम्। विश्वे भातृत्वं कीदृशं भवितव्यमिति बोधयितुमेव प्रवृत्तमिदं सूक्तम्। अत्र मित्रः प्राणान् रक्षयति वरुणश्च जलानि धारयति। वरुणश्च जलधारकरूपेण अथवा वृष्टिकारकरूपेण प्रतिपादितः। ऋग्वेदस्य ऐतरेयब्राह्मणग्रन्थानुसारेण मित्रः रात्रिरूपेण वरुणश्च दिनरूपेण प्रतिपादितौ। अस्य मित्रावरुणसूक्तस्य आत्रेयः श्रुतिविद् ऋषिः, मित्रावरुणौ देवौ, त्रिष्टुप् छन्दः।

पाठान्तप्रश्नाः

(विष्णुसूक्ते)

१. विष्णुसूक्तस्य सारं लिखत।

२. विष्णोर्नु कं वीर्याणि... इत्यादिमन्त्रं व्याख्यात।

३. प्र तद्विष्णुः... इत्यादिमन्त्रं व्याख्यात।

४. प्र विष्णवे शूषमेतु मन्म... इत्यादिमन्त्रं व्याख्यात।

५. यस्य त्री पूर्णा... इत्यादिमन्त्रं व्याख्यात।

६. तदस्य प्रयमभि पाथो अश्याम्... इत्यादिमन्त्रं व्याख्यात।

७. ता वां वास्तून्युश्मसि... इत्यादिमन्त्रं व्याख्यात।

(मित्रावरुणसूक्ते)

८. मित्रावरुणसूक्तस्य सारं लिखत।

९. ऋतेन ऋतमपिहितम्... इत्यादिमन्त्रं व्याख्यात।

१०. अक्रविहस्ता सुकृते... इत्यादिमन्त्रं व्याख्यात।

११. आ वामश्वासः... इत्यादिमन्त्रं व्याख्यात।

१२. यद्बंहिष्ठं नातिविधे... इत्यादिमन्त्रं व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तरपूगः- (विष्णुसूक्ते)

१. ऋषि: दीर्घतमा औचथ्यः, छन्दः विराट् त्रिस्टुप्, देवता विष्णुः।

२. नु कम्।

३. व्यापनशीलः।

४. वीरकर्माणि।

५. विविधं निर्मितवान्।

६. लोकवाची।

७. त्रेधा।

८. कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगन्ता वा।

९. अस्मत्कृत्यादिजन्यं बलं महत्त्वम्।

१०. अधोवर्तीनि अतलवितलादिसप्तभुवनान्युपात्तानि।

११. धृतवान्।

१२. त्रयाणां धातूनां समाहारः।

१३. अन्तरिक्षम्।

१४. सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः।

१५. कामयामहे।

उत्तरपूगः- (मित्रावरुणसूक्ते)

१६. आत्रेयः श्रुतविद् ऋषिः, मित्रावरुणौ देवते, त्रिष्टुप् छन्दः।

१७. ध्रुवम्।

१८. आच्छादितम्।

१९. उदकम्।

२०. स्था-धातोः लिट्-लकारे प्रथमपुरुषबहुवचने।

२१. सततगन्ता।

२२. ङीप्।

२३. पू-धातोः 'अच इः' इति औणादिकसूत्रेण इप्रत्यये।

२४. धे-धातोः।

२५. जीरं दानू ययोस्तौ इति बहुव्रीहिसमासः।

२६. क्षिप्रदानौ।

२७. पिव्-धातोः।

२८. अश्वाः।

२९. धृ-धातोः णिचि लङ्-लकारे मध्यमपुरुषद्विवचने।

३०. निर्पूर्वकनिज्-धातोः क्विप्प्रत्यये प्रथमैकवचने।

उत्तरपूगः- (मित्रावरुणसूक्ते)

३१. यज्ञः।

३२. पृथिवी।

३३. यागभूमिषु।

३४. धृतः दक्षः ययोस्तौ धृतदक्षौ इति बहुव्रीहिसमासः।

३५. आस्-धातोः आत्मनेपदे लट्-लकारे मध्यमपुरुषद्विवचने।

३६. अकृपणहस्तौ।

३७. न क्रविः अक्रविः, अक्रवी हस्तौ ययोस्तौ अक्रविहस्तौ इति बहुव्रीहिः।

३८. सहस्रं स्थूणाः यस्य तं सहस्रस्थूणम् इति बहुव्रीहिसमासः।

३९. रूपनाम।

४०. देवयजनस्थानम्।

४१. तिलुः स्निग्धा इला भूमिर्यस्य तत् क्षेत्रम्।

४२. गर्ते इति अधिगर्तम् इति अव्ययीभावसमासः, अधिगर्ते भवः इति अधिगर्त्यः।

४३. शोभनदानौ।

४४. बहुलतमम्।

४५. सुखं गृहं वा।

॥इति विंशः पाठः॥